**प्रणत** त्रि० प्र+नम-कर्त्तरि क्त। कृतप्रणामे त्रिका०। प्रह्वे

**प्रणति** स्त्री प्र+नम–भावे क्तिन्। प्रणामे करशिरःसंयोगादिरूपे स्वापकर्षबोधकव्यापारे।

**प्रणदन** पु० प्र+नद–भावे ल्युट्। प्रणादे अमरः।

**प्रणपात्** त्रि० प्रकर्षेण नपात् नभ्राडित्यादिना नस्य प्रकृतिभावः पूर्वपदात् णत्वम्। प्रकर्षेण न पातयितरि ऋ० ८।१७।१३ [३विश्वासे ४निर्वाणे च मेदि०।

**प्रणय** पु० प्र+नी–अच्। १प्रेम्णि अमरः २प्रार्थनायां

**प्रणयन** न० प्र+नी-भावे ल्युट्। १प्रकर्षेण नयने २करणे च ३अग्नेः संस्कारभेदकरणे कात्या०श्रौ० ६।१०।१४।

**प्रणयनीय** त्रि०प्र+नी·कर्मणि अनीयर्। १प्रकर्षेण नेतव्ये २संस्कार्य्ये वह्नौ च प्रणयनस्य वह्निसंस्कारस्येदम् छ। ३वह्निसंस्कारसम्बन्धिनि इध्मकाष्ठादौ कात्या०१।३।२१

**प्रणयिन्** त्रि० प्रणयोऽस्त्यस्य सुखा० गणे पाठात् "नैकाचरात् कृतोजातेरिति" निषेधस्याप्रवृत्तेः इनि। १प्रणययुते २स्वामिनि पु० हेमच०। ३भार्य्यायां स्त्री ङीप्।

**प्रणव** पु० प्रकर्षेण नूयतेऽनेन प्र+नू-अप्। १ओङ्कारे वेदादौ पाठ्ये शब्दभेदे अमरः। १५५८ पृष्ठादौ दृश्यम्। उद्गात्रादीनां गानारम्भात् प्राक् यजमानेन ओमित्युक्त्वा गेये २सामावयवभेदे च। प्रणूयते प्र+णू-कर्मणि अप्, प्रणववाच्यत्वाद्वा। ३परमेश्वरे पु० "प्राणदः प्रणवः पृथुः" "प्राणदः प्रणवः पणः" विष्णुस०। द्विधा व्युत्पत्तियोगात् द्वे नामनी। [णत्वम्। प्रनतनासिके

**प्रणस** त्रि० प्रगता नासिका अस्य नसादेशः अच्समा०

**प्रणाडी** स्त्री प्रणाली+लस्य डः। १प्रणालीशब्दार्थे २द्वारमात्रे च "तस्यां स्थितौ व्यभिचारस्य धनं प्रणाड्या प्रतिपद्य निष्पादयति" दायभागः।

**प्रणाद** पु० प्र+नद-घञ्। अनुरागजे शीत्कृतादौ १शब्दे अमरः। "अनुरागकृते शब्दे प्रणादः शीत्कृतो नृणामिति शब्दार्णवः। २तारशब्दे ३श्रवणामये च मेदि०। श्रवणामयश्च कर्णनादः "कर्णस्रोतःस्थिते वाते शृणोति विविधान् स्वरान्। भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते" सुश्रुतः।

**प्रणाम** पु०प्र+नम-भावे घञ्। प्रह्वतौ १स्वापकर्षबोधकव्यापारे करशिरःसंयोगादौ "पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा। वचसा मनसा चैव प्रणामोऽष्टाङ्ग उच्यते" इत्युक्ते २अष्टाङ्गव्यापारभेदे च प्रणामश्च चतुर्द्धा अभिवादनम् अष्टाङ्गः पञ्चाङ्गः करशिरःसंयोगश्च। तत्राभिवादनशब्दे अभिवादनलक्षणं दृश्यम्। अष्टाङ्गलक्षणमुक्तं तृतीयो यथा "बाहुभ्याञ्चैव जानुभ्यां शिरसा वचसा दृशा। पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवरः स्मृतः"। नतिविशेषस्तु जामले "त्रिकोणाकारा सर्वत्र नतिः शक्तेः समीरिता। दक्षिणाद्वायवीं गत्वा दिशं तस्याश्च शाम्भवीम्। ततश्च दक्षिणां गत्वा नमस्कारस्त्रिकोणवत्" एकहस्तप्रणामनिषेधो यथा "एकहस्तप्रणामश्च एकं वापि प्रदक्षिणम्। अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम्" इति तन्त्रसारः। स च कायिकवाचिकमानसभेदेन प्रत्येकं त्रिविधः यथा "कायिको वाग्भवश्चैव मानसस्त्रिविधः स्मृतः। नमस्कारस्तु तत्त्वज्ञैरुत्तमाधममध्यमः। प्रसार्य्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ। जानुभ्यामवनीं गत्वा शिरसाऽऽस्पृश्य मेदिनीम्। क्रियते यो नमस्कार उत्तमः कायिकस्तु सः। जानुभ्यां क्षितिमस्पृष्ट्वा शिरसाऽऽस्पृश्य मेदिनीम्। क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः। पुटीकृत्य करौ शीर्षे दीयते यद्यथा तथा। अस्पृष्ट्वा जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते। यः स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः। क्रियते भक्तियुक्तैर्वा वाचिकस्तूत्तमः स्मृतः। पौराणिकैर्वैदिकैर्वा मन्त्रैर्या क्रियते नतिः। मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा। स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ!। इष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं पुनः। मननं मानसं प्रोक्तमुत्तमाधममध्यमम्। त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः। कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति नित्यशः। अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः। प्रणाम इति विज्ञेयः स पूर्वं प्रतिपादितः" कालिकापु० ७०अ०। शूद्रसंस्कृतपूजितदेवताप्रणामनिषेधो यथा "यः शूद्रेणार्च्चितं लिङ्गं विष्णुं वा प्रणमेद्यदि। निष्कृतिस्तस्य नास्त्येव प्रायश्चित्तायुतैरपि" इति कर्मलोचनम्। "नमेत् यः शूद्रसंस्कृतम्" इत्यादि च।

**प्रणाय्य** त्रि० प्र+नी–ण्यत् "प्रणाय्योऽसम्मतौ" पा०नि०। १चौरे २प्रीतिहीने ३विरक्ते च सि०कौ०, ४अभिलाषवर्जिते मेदि०। ५साधौ त्रिका० ६प्रिये च। असम्मतिभिन्नेषु प्रणेय इत्येव।

**प्रणाली** स्त्री प्र+नल-घञ् गौरा० ङीष् णत्वम्। १जलवहनमार्गे (पयनाला) अमरः २परम्परायाञ्च। प्रणालोऽप्यत्र पु०।

**प्रणिधान** न० प्रणिधीयते प्र+नि+धा-ल्युट्। १प्रयत्ने २अ-